CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ॐ श्रीगणेशायनमः अथविवाहपद्धतिलिख्यते ततोवि
वाहलग्नात्कोतिपयावशिष्टादिवसेषुशुभलग्नेविवाहोक्त-
क्षेत्रे संस्कार्य्यपुत्रस्य संस्कार्य्याकन्यायाश्च· पितापत्न्यासा
हकृताभ्यंगस्नानः अहतवासाःशुभासनेप्राङ्मुखउपवि
श्याचम्य कन्यापितावरपिताचसर्वारंभनिमित्तंगणेशपूजनं
कुर्य्यात् अर्घ्यंसंस्थाप्यपूजासंकल्पः अद्येहेत्यादि अमुक
गोत्रोऽमुकशर्म्माहं अमुकराशेःकन्यायाविवाहकर्मणस
र्वारंभकर्म्मणिनिर्विघ्नप्राप्तयेगणेशस्यपूजनंकरिष्ये इति
संकल्प्य· गणेशंसंपूज्य· वस्त्रसीवनपक्वान्नादिकरणेऽर्कं कु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वि॰प॰

य्यात ततो विवाहात्पूर्वदिने तद्दिने वा कन्यापिता पूर्वां ग[illegible]म्मं
कुर्य्यात आदौ गणेशं संपूज्य प्रधान संकल्पं कुर्य्यात [illegible]द्ये
हत्या द्देश कालौ संकीर्त्य ऽमुकगोत्रोऽमुकशर्म्माहं [illegible]मुकं
राशेः अस्याः कन्यायाः वीजगर्भसमुद्भव दुरितक्षयपूर्वक [illegible]त्र्यास
हधर्म्मप्रजोत्पादन द्वयपरिग्रहेष्वधिकारसिद्धिद्वारा श्रीपरमे
श्वरप्रीत्यर्थे विवाहाख्यं संस्कारं करिष्ये इति संकल्पः [illegible]नांदि
पूजानांदीश्राद्ध पुण्याहादिकं कृत्वा कलशे नवग्रह पूजनं
विधाय लेख्य गौरीहरयोर्मूर्त्तिं लिखित्वा कन्याहस्तेन पू[illegible]
नं अर्धसंस्थाप्य पूजनसंकल्पः अद्येहामुकगोत्रा[illegible]

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

करा शिरसुकेद्य्यहे सकलसौभाग्यसम्पद्भ्य लक्ष्म्यगौ
रीहरयोः पूजनं करिष्ये एतं तं देवसवितः इति प्रतिष्ठा
ॐ भूर्भुवः स्वः लक्ष्मेगौरीहरौ सुप्रतिष्ठितौ वरदौ भवतां
अथ ध्यानं सिंहासनस्थां देवेशीं सर्वालंकारभूषितां पी
तांवरधरं देवं चंद्रार्द्धकृतशेखरं करेणाधःसुधापूर्णकं
लशं दक्षिणेनतु वरदं चाभयं वामेनाश्लिष्यचतनुप्रियां
एवं ध्यात्वा प्रजपमंत्रैः पुराणभाजस्तथा स्त्रियः पूजामंत्रः
गौरीहर महेशान सर्वमंगलदायक पूजां गृहाण देवेश स
र्वदा मंगलं कुरु इति मंत्रेण पाद्याद्यादिभिः संपूज्य कन्यादे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हप्रमाणेनसप्तविंशतितंतुभिः वर्त्तिकादीपयत्पश्चाद्वृत
वि॰प॰ २ संपत्तिहेतवे एवंवर्त्तिकांकृत्वानीराजनंविधाय भोज
नीयब्राह्मणाश्चसुवासिन्यः सुपूजितादशाष्टपंचयुग्म
वाहरणेपनाथतोषयेत् अत्रकात्यायनीमहालक्ष्मी
रपिनामंत्रेणपूजनंकार्य्यं इतिकन्यापक्षविधिः अथव
रपक्षविधानं अथवरपिताशुभेविवाहात्पूर्वदिनेतद्दिने
वापूर्वांगंकुर्यात् प्रथमंगणेशपूजनंकार्य्यं आचम्यार्घ
संस्थाप्य पूजासंकल्पः अद्येहामुकोहंअमुकराशिपुत्र राम॰ २
स्यकरिष्यमाणविवाहकर्म्मणःपूर्वांगकर्म्मणिनिर्विघ्न

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तासिद्ध्ये गणेशस्य पूजनं करिष्ये इति गणेशं संपूज्य प्रधा
नसंकल्पः अद्येहेत्यादि देशकालौ स्मृत्वा ऽमुकगोत्रो
ऽमुकशर्माहं ऽमुकराशेः ऽमुकशर्म्मणः पुत्रस्य देवपितॄणां
पाककरणहेतु धर्म्मप्रजोत्पादनसिद्धिद्वारा श्रीपरमेश्वर
प्रीतये विवाहाख्यसंस्कारं करिष्ये तत्पूर्वांगत्वेन मातृपूजा
नांदीश्राद्धपुण्याहवाचनकलशस्थापनग्रहपूजनानि क
रिष्ये इति संकल्पः मातृपूजानांदीश्राद्धपुण्याहवाचन
कलशस्थापननवग्रहपूजनं च विधाय वरहस्ते वरमातृ
हस्तेन कंकणबंधनं विधाय सर्वां विवाहसामग्रीं गृही

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्रि.प.
३

त्वा विवाहपुत्रं मुकुटकंकणभूषणकौशुंभरंजितवस्त्रा
दि भूषितं कृत्वा मंगलतूर्य्यघोषेण कौसुंभपालाशपु
ष्परंजितवस्त्रादिभूषिता वरपक्षिणः वरसहिताः कन्यापि
तृगृहं गच्छेयुः कन्यापिता वरशिविकादियानं स्वगृहस
मीपे वास्य वरं यानादुत्तार्य्य पादौ प्रक्षाल्य स्वयमुदङ्मु
ख आचार्य्यसहितं वरं स्वस्तिकादि चर्चितदेशोपरि तलकु
डिकायां वरस्य पादौ प्रक्षाल्य तज्जलं शिरसि अभिषि
च्य यज्ञीयकाष्ठनिर्म्मितचतुष्पादपीठासने निवेशयि
त्वा वरपूजां कार्य्या आचम्य गणेशं नमस्कृत्य अर्घसं

राम:
२

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्थापनं कुर्य्यात् प्रथमं वाग्दानं विधाय तत्र संकल्पः
अद्येहेत्यादि अमुकशर्म्माहं करिष्यमाणकन्यादानांगत्वे
न वराय वाग्दानं करिष्ये ततः कुंकुमाक्तानि पंचफलान्या
दाय अमुकगोत्रोऽमुकप्रवरोमुकवेदांतशाखाध्यायी
अमुकशर्म्माहं अमुकगोत्रोत्पन्नस्याऽमुकप्रवरस्याऽमुक
वेदाध्यायिनःऽमुकशर्म्मणः प्रपौत्रायऽमुकशर्म्मणः पौ
त्रायऽमुकशर्म्मणः पुत्राय ऽमुकनाम्ने विष्णुस्वरूपिणे
कन्यार्थिने वराय अमुकगोत्रोत्पन्नस्य अमुकप्रवरस्यऽ
मुकवेदाध्यायिनः अमुकशर्म्मणः प्रपौत्री अमुकशर्म्म

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

णः पौत्री अमुकशर्म्मणः पुत्री अमुकनाम्नी श्रीरूपिणीव
वि॰ रार्थिनी कन्यां ज्योतिर्विदादिष्टे मुहूर्त्ते तुभ्यं दास्ये तत्प्र
४ तिग्रहार्थं एभिर्गंधाक्षतपुष्पफलद्रव्यभूषणाद्युपचा
रैस्त्वामहं वृणे इति वरं वृत्वा वाग्दानं कृत्वा अथ द्वारागत
वरपूजा आचम्य अर्घस्थापनं कृत्वा प्राणायामं विधाय
संकल्पः अद्येह देशकालौ संकीर्त्य अमुकगोत्रोऽमुकरा
शिरमुकशर्म्माहं करिष्यमाणकन्यादानप्रतिग्रहार्थं द्वा
रामः रदेशागतस्य वरस्य पूजनपूर्वकं वरणं करिष्ये तस्य पूर्वां
गत्वेन वरकन्ययोः पाणिग्रहणकर्म्मणि आचार्य्यकर्म्म ४

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कर्तुं आचार्य्यस्य पूजनं वरणं च करिष्ये इति संकल्पः मू
भिर्देवायजन्मासित्वं विप्रपुरुषोत्तम प्रत्यक्षोयज्ञपुरुष
अर्घं मे प्रतिगृह्यतां इति मंत्रेणाचार्य्यायार्घं दत्वा गंधा
क्षतपुष्पैः संपूज्य एभिर्गंधाक्षतपुष्पमालायज्ञोपवीतपुंगी
फलद्रव्यवासोभिः करणोः वरकन्ययोः करिष्यमाणविवाह
कर्म्मणि आचार्य्यकर्म्मकर्तुं आचार्य्यत्वेन त्वामहं वृणे
वृतोस्मीति प्रत्युक्तिः ततः आचार्य्याय ऽर्घं दद्यात् ॐ अ
र्घोऽर्घोऽर्घः प्रतिगृह्यतां इत्यर्घं दद्यात् ततः आचार्य्यप्र
रवाः पठंति ॐ अथर्वरं वृणीते वलवद्वै देवा एतयहस्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वि·प· होमेप्रशंसंतितेतस्माद्वरंवृणीते अथवारात्र्यउपानहा
५ उपमुंचतेसग्नोहवेस्वाघृतकुंभंप्रवेशयांचक्रुः ततोवरा
हसंवभूवतस्माद्वाराहोमेदुरोघृतांघ्रीसंवभूव तस्माद्वा
राहगावःसंजनतेस्वमेवैतङ्समाभिसंजनते तत्पारंनी
यतेप्रतिष्ठति तस्माद्वाराह्याउपानहाउपमुंचतेसआज
गामगौतमोवभूवारुणस्यजैवलेरासतस्मादासनमाहार्घो
दकमहारयांचकाराथास्माअर्घंचकार सहोवाचवरंव
दंति गौतमायदघ्नदितिसहोवाचप्रतिज्ञायते मयैषप्र राम:
तियांतुकुमारस्यांतेवाचमभाषथास्तांमेब्रूहीतिसहोवाच

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विज्ञायतेहास्तिहिरण्यस्य पात्रं गोश्चानादासदासीनांप
रिवाराणांपरिधानानांमातोमहान्यर्थ्यंन्यस्यामवधान्योन्मू
यासद्भः सवैगोत्तमतीर्थेनेक्षामहस्पुपद्मेहं भवंतमित्वा
ब्राह्मस्मैपूर्वमुपनयंतिसहोपायनकीर्त्या उवाचवाचा
स्तुवाचः इतिपठित्वा आगतोसिवरश्रेष्ठधर्म्मकामार्थसि
द्धये प्रतिग्रहसमर्थोसि॰ अर्घंग्र॰ हूनमोऽस्तुते आपः
क्षीरंकुशाग्राणिदध्याविरततंडुलैः यवैःसिद्धार्थकैश्चै
वअष्टांगोर्घःप्रकीर्तितः ओं अर्घोऽर्घोऽर्घः प्रतिगृह्यतां
वरःप्रतिगृह्णामि॰ इतिप्रतिगृह्य ॐ आसोयस्ताम्त्राऽरुण

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वि॰प॰
१६

उतत्वम्मूत्तमंगलं येवैनᳯरुद्रा अभितोदिक्षुश्रिताःसह
स्रशोवैषाᳯहेडईमहे ॐ असौयोवसर्पतिनीलग्रीवावि
लोहित उतैनंगोपा अदश्रनदृशन्नुदहार्य्य सदृष्टोमृड
यातिनः २ नाभौहस्तेप्रदातव्यंस्कंधेशिरसिपादयोः जा
नुभ्यामुदरे चैवमष्टांगोर्घःप्रकीर्तितः अष्टांगेर्घंदत्वा गंध
द्वारामितिगंधं नमोस्त्वनंतायेति॰ अक्षतपुष्पैर्वरंसंपूज्य
वरायांसामग्रींगृहीत्वा एभिर्गंधाक्षतपुष्पद्रव्ययज्ञोपवीत
पुष्पमालाकंचुकोष्णीयादिवासःकर्णाभूषणाकरभूषण
दिभिः अनयावरमुद्रिकयाचकन्यादानंप्रतिग्रहार्थं अमु रामः
६

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कगोत्रं अमुकप्रवरं अमुकवेदशाखाध्यायिनं अमुकशर्माणं
वरत्वेन त्वामहं वृणे वृतोस्मीति वरो वदेत् ततो वरणाय यज्ञोप
वीतपूर्वकमालाकर्णभूषणांबरमुद्रिकाधारणं कृत्वा अभि
षेकं तिलकं च कृत्वा मंत्रपाठः ॐ अग्नये त्वा मह्यं वरुणो
ददातु सोमृतत्वमशीय प्राणो दात्रे येधि मह्यं प्रतिदहित्रे
रुद्राय त्वा मह्यं वरुणो ददातु सोमृतत्वमशीयायुर्दात्रे ये
धि मयो मह्यं प्रतिग्रहीत्रे बृहस्पतये त्वा मह्यं वरुणो ददा
तु सोमृतत्वमशीयधि ग्दात्रे येधि मयो मह्यं प्रतिग्रहीत्रे
यमाय त्वो मह्यं वरुणो ददातु सोममृतत्वमशीय हयो दा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्रेयधिमयोमह्यंप्रतिगृहीत्रे यमायत्वामह्यंवरुणोद
दातुसोमृतत्वमशीयहयोदात्रेयधिमयोमह्यंप्रतिगृही
त्रे ॐकोदात्कस्माअदात्कामोदात्कामायादात्कामोदा
ताकामःप्रतिगृहीताकामैतत्तते इतिमंत्रपाठंकृत्वा कन्या
पित्रेदद्यात् ततोवत्स्यादिभिर्वानीराजनंकुर्यात् इतिदे
शाचारः इतिमधुपर्कविधिः ततोवाद्यपुरस्सरंस्वस्तिवा
चनंपठन् विवाहशालायांगच्छेत् प्रथमाचार्य्यवरयोक्ति
लकंविधाय ततःप्राङ्मुखंवरंपश्चिमामुखीकन्यांस्वयं
दाताउदङ्मुखोभूत्वा सर्वांविवाहसामग्रीयथास्वमनमा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

साद्यरक्तकंबलादिभिरलंकृत्वा शुभासनेउपविश्या
चम्य अर्घस्थापनंकृत्वा प्राणायामंविधाय संकल्पः अ
द्येहेत्यादिदेशकालौसंकीर्त्य ऽमुकगोत्रोऽमुकराशिरमुकश
र्म्माहंकन्यादानप्रतिग्रहार्थंगृहागतंस्नातकंवरं मधुपर्केण
र्चयिष्ये यथावरोपि अर्घस्थापनंविधायसंकल्पंकुर्य्यात
अद्येहामुकराशिरमुकशर्म्माहंधर्म्मप्रजार्थं अर्घयजुःशा
खोक्तविधिनाविवाहकर्म्माहंकरिष्ये इतिसंकल्पः मधुप
र्कविधिस्तुवरशाखोक्तःकार्य्यः तत्रपारास्करसूत्रम् षड
र्घ्याभवंत्याचार्य्यऋत्विक्वैवाह्योराजाप्रियस्नातकइति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रतिसंवत्सरानर्हयेयुः अथयजमानः पीठमासनमादायाव्य
वि॰प॰ ८ ह साधुभवानास्तामर्चयिष्यामोभवं[illegible] तमर्चयेतिवरस्यो
क्तिःपादादारभ्याशिरःप्रतिरत्यतां वरःप्रतिगृह्णामीत्युक्त्वा
एकंविष्टरमादायाह वर्ष्मोस्मीत्याथर्वणऋषिरनुष्टुप्छंदः
विष्टरोदेवताउपवेशनेविनियोग ओंवर्ष्मोस्मिसमानानामु
द्यतामिवसूर्य्यः इमंतमभितिष्ठामियोमाकश्चाभिदासति
इतिमंत्रंपठित्वा विष्टरेउपविशति ततःपाद्यं२
प्रतिगृह्यतां अहंप्रतिगृह्णामीतिवरःप्रतिगृह्य तत्पात्रं रामः ८
भूमौनिधाय अंजलिनाजलमादायदक्षिणंपादंप्रक्षाल

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यति मंत्रः विराजोदोह इतिप्रजापतिर्ऋषिर्यजुश्छंदः आपो
देवता दक्षिणपादप्रक्षालने विनियोगः ॐ विराजोदोहमसि
विराजोदोहमसीय मयिपाद्यविराजोदोहमसि अनेनवाम
पादंप्रक्षालयेत् क्षत्रियादीनांवामपादंप्रथमं ततो द्वितीयं
विष्टरंकलशद्रव्यंदत्वाद्दद्यात् संकल्पः अद्येहअमुकश
र्म्माहं आदित्यादिनवग्रहाणांप्रीतयेइदंसुवर्णादिकलश
द्रव्यंकन्यापक्षीयब्राह्मणायददामि तत्सत् इतिद्रव्यंदत्वा द्वि
तीयंविष्टरंदद्यात् विष्टरोप्रतिगृह्यतां अहंप्रतिगृह्णामि
पूर्ववद्वर्ष्मोस्मीतिमंत्रंपठित्वोपविशयेत् पादयोरधस्तात्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

निदध्यात् ततोयजमानः अर्घोऽर्घोऽर्घः प्रतिगृह्यतांवरः
प्रतिगृह्णामीतिप्रतिगृह्य· मंत्रः आपस्थेतिप्रजापतिरृषि
र्यजुश्छंदः आपोदेवता अर्घग्रहणेविनियोगः ॐ आपस्थयु
ष्माभिः सर्वान्कामानवाप्नुवानीति मंत्रंपठित्वा अर्घम
भिमंत्रयेत् समुद्रमित्यथर्वणऋषिरनुष्टुप्छंदः आपोदे
वताऽर्घाभिमंत्रणेविनियोगः ॐ समुद्रंवः प्रहिणोमिस्वां
योनिमभिगच्छत अरिष्टास्माकंवीरामापरासेचमत्पयहीति
अथाचमनीयं ३ प्रतिगृह्यतां इत्युक्तेवरः प्रतिगृह्णामीत्यु
क्त्वाऽऽचमनंकुर्यात् मंत्रः आमागन्नेतिपरमेष्ठीऋषिर्बृह

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्पतिश्छंदः आपो देवता चमने विनियोगः ॐ आमागमन्स
शासंसृज वर्चसा तमाकुरु प्रियंप्रजानामधिपतिं पशू
नामरिष्टं तनूनां इति मंत्रेणा सकृदाचम्य स्मार्त्ताचमनं कु
र्यात् अथ दधिमधुघृतं कांस्ये स्थापितं कांस्यपात्रेण पि
हितं मधुपर्कं वराय निवेदयेत् ॐ मधुपर्को मधुपर्को मधुप
र्कः प्रतिगृह्यतां वरः अहं प्रतिगृह्णामीत्युक्ता यजमानह
स्तो द्घाटितं मधुपर्कमीक्षमाणो मंत्रं पठेत् मित्रस्य तेति बृ
हस्पतिऋषिर्यजुः छंदो मधुपर्को देवता प्रेक्षणे विनियोगः
ॐ मित्रस्य त्वा चक्षुषा सर्वाणि भूतानि समीक्षंतां मित्रस्य त्वा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वि०प० चक्षुषासर्वाणिभूतानिसमीक्षेमित्रस्यत्वाचक्षुषासर्वा
१० णिभूतानिसमीक्षामहे इतिसमीक्ष्य देवस्यत्वेतिबृहस्पति
रांगिरसोऋषिर्यजुश्छंदः सवितादेवतामधुपर्कग्रहणेवि
नियोगः ॐ देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णो
हस्ताभ्यांप्रतिगृह्णामि इतिप्रतिगृह्य सव्यपाणौनिधाय
दक्षिणस्यानामिकयात्रिःप्रयौतित्रिवारंमिश्रयति मंत्रः
नमःस्यावेतिप्रजापतिऋषिर्यजुःछंदः सवितादेवताम
धुपर्कनिरूक्षणेविनियोगः ॐनमःस्यावाश्यायान्नश
नेयतआविद्धंतत्तेनिष्कृतामि इतिसकृदालोड्य त्रयं यु रामः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ष्ठानामिकाभ्यां त्रिवारं निरूक्षणं कृत्वा त्रिः प्राश्नाति यन्म
धुन इति कुत्स ऋषिर्जगती छन्दो मधुपर्को देवता प्राशने वि
नियोगः ॐ यन्मधुनो मधव्यं परमꣳ रूपमनाद्यं तेनाहं म
धुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योन्नादोशा
नीति इति मंत्रेण द्विवारं मधुपर्कप्राशनं मधुवाता ऋताय
ते· इत्यृचापि प्राशनं कृत्वा शेषं पुत्राशिष्याय वोत्तरतत्रासी
नायुवोच्छिष्टं दद्यात् सर्वं वा प्राश्नीयात् असंचरे वा प्रक्षिपे
र आचम्य· प्राणान् संस्पृशेत् संहताभिस्तिसृभिस्तर्जनी
मध्यमानामिकाभ्यां अक्ष्णोर्मे चक्षुरस्त्विति नासिकारंध्रेः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कि॰प॰ २२

अंगुष्ठप्रदेशनीभ्यां अनामिकाभ्यां चक्षुषोर्मेचक्षुरस्त्वी
ति चक्षुषी कर्णयोर्मे श्रोत्रमस्त्विति कर्णौ बाह्वोर्मे बल
मस्त्विति युगपद्बाहू ऊर्वोर्मे ओजोस्त्विति ऊर्वौः अरिष्टा
नि मेंगानि सन्तु तनूस्तन्वा मे सहेति शिरः प्रभृति पादांतं
आलभेत ततो द्विराचमनं कृत्वा यजमानः खड्गमादाय
गौः गौ गौरिति त्रिराह नालभ्यतामिति वदेत् मातेति ब्रह्मा
ऋषिर्यजुश्छन्दो गौर्देवता गोरभिमंत्रणे विनियोगः ॐमा
तारुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः
प्रणुवोचं चिकितुषे जनाय मागामनागामदितिं मावधिष्टः

रामः २२

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ममचामुष्य [illegible]र्म्मणो यजमानस्य चोभयोः पाप्मानं हत
उत्सृजतु तृणान्यत्तु इति पठित्वा कुशपत्रस्योत्सर्ग एवं ना
लंभनं चोटनेन कुर्यात् गोरालंभनमिति तद्दक्षिणासंक
ल्पः अद्येहामुकशर्म्माहं मधुपर्कोत्सर्ज्जनकर्म्मणः सांगु
ण्यार्थं इमां दक्षिणामाचार्य्याय ददास्ये उभयपक्षा दक्षिणा
संकल्पं दद्यात् अस्मिन्नवसरे वरपक्षीयः कश्चिद्ब्राह्मणो
वहिः शालायामागत्य वेदीकृत्वा पंचभूसंस्कारपूर्वकम
ग्निं संस्थापयेत् अग्निस्थापनानंतरं कन्यावस्त्रपरिधान
मंत्रः जरां गच्छ इति प्रजापतिर्ऋषिस्त्रिष्टुप् छंदः वासोद्व

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्याकन्यावस्त्रपरिधानेविनियोगः ॐजरांगच्छपरिधत्स्व
वि.प वासोभवाकृष्टीनामभिशस्तिपावाशतंचजीवामिशरदः
१२ पुरूचीरायस्पोषमभिसंव्ययस्वायुष्मतीदंपरिधत्स्ववा
सः याअकृंतन्निति प्रजापतिऋषिस्त्रिष्टुप्छंदोवासो
देवता उत्तरीयपरिधानेविनियोगः याअकृंतन्नवयंन्या
तन्वतयाश्चदेविस्तन्तूनभीतोततथतास्त्वादेविजरसेसंव्य
यस्वायुष्मतीदंपरिधत्स्ववासः अथवरःस्वयंपरिधत्तेप
रिधास्यतिअथर्वणऋषिःपंक्तिछंदःवासोदेवतावस्त्रप रामः
रिधानेविनियोगः ॐपरिधास्येयशोधास्येदीर्घायुत्वाय १२

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रद्दष्टिरद्दष्टिरश्मिः शतंवर्जीव्यामिशरदः सुवर्चारायस्पो
षमभिसंव्ययिष्ये अथोत्तरीयं ओंयशसामाद्यावापृथि
वीयशसेंद्रायबृहस्पतिर्यशोभगश्चमाविंद्याद्यशोमाप्र
तिपद्यतां ततआचम्य अथकन्यापितापरस्परंसमंजे
थामितिकन्यावरौसन्मुखीकुर्यात ओंसमंजंतुविश्वेदे
वासमापोहृदयानिनौसंमातरिश्वासंधातासमुदेष्टीद
धातुनौ इतिपठित्वा अथवंशगोत्रप्रवरनिश्चयार्थंगो
त्रोच्चारः कर्त्तव्यः तत्क्रममाह कारिकाकारः उच्चारःप्रति
लोमेनपितॄणांसर्वकर्म्मसुकन्यादानेनयज्ञेचावरु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

लोमेनसंस्मृतः तत्रपूर्वकन्यापत्नियोब्राह्मणआशीर्वाद
श्लोकंपठेत् जेतुंयस्त्रिपुरंहरेणहरिणाव्याजाद्बलिंव
ध्नतास्त्रष्टुंवारिभवोद्भवेनभुवनंशेषेणधर्तुंधरां पार्व
त्यामहिषासुरप्रमथनेसिद्धादिभिर्मुक्तये ध्यातःपंचशर
णाविश्वविजयेनागाननःपातुवः तत्रेत्थंवाक्यं किंगो
त्रस्यकिंप्रवरस्यकिंशाखिनःकिंवेदाध्यायिनःकिंशर्म्म
णःप्रपौत्राय किंगोत्रस्यकिंप्रवरस्यकिंशाखिनःकिंवे
दाध्यायिनःकिंशर्म्मणःपौत्राय किंगोत्रस्यकिंप्रवर
स्यकिंशाखिनःकिंवेदाध्यायिनःकिंशर्म्मणःपुत्राय त्रि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अस्मतेकन्यार्थिनेविष्णुस्वरूपायोकिंनाम्नेवराय अथ
वरपक्षीयोब्राह्मणोपठेत मातस्तातजटास्तुकिंस्तुरसरि
त्किंशेखरेचंद्रमाभालेकिंहुतभुक्कलुटस्यरासिकिंनागाधि
पःकिंकटौ कृत्तिःकिंजघनद्वयांतरगतंकिंदीर्घमालंवतं
कृत्वापुत्रवचोंबिकास्मितमुखीलज्जाननापातुवः २ अ
मुकगोत्रस्य अमुकप्रवरस्यामुकशाखिनोऽमुकवेदाध्या
यिनः अमुकशर्म्मणःप्रपौत्राय अमुकगोत्रस्य अमुक
प्रवरस्य अमुकशाखिनोऽमुकवेदाध्यायिनोऽमुकशर्म्म
णःपौत्राय अमुकगोत्रादेरमुकशर्म्मणःपुत्राय अमुक

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वि॰प॰ २८

नाम्ने विष्णुस्वरूपिणे कन्यार्थिने वराय किंगोत्रस्य
किंप्रवरस्य किंशाखिनः किंवेदाध्यायिनः किंशर्म्मणः
प्रपौत्री किंगोत्रस्य किंप्रवरस्य किंशाखिनः किंवेदाध्या
यिनः किंशर्म्मणः पौत्री किंगोत्रस्य किंप्रवरस्य किंशाखि
नः किंवेदाध्यायिनः किंशर्म्मणः पुत्री आयुष्मती वरार्थि
नी श्रीरूपिणी किंनाम्नी कन्या कन्यापक्षीयः पठेत् जान
क्याः कमलायताञ्जलिपुटे या पद्मरागायितान्यस्ताराघ
वमस्तके परिलसत्कुंदप्रसूनायता स्रस्ताश्यामलकाय
कांतिनिकरे या स्विडनीलायता मुक्तास्तासफलाभवंतु

राम॰ २८

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवतां श्रीरामवैवाहिकाः ३ अमुकगोत्रस्याऽमुकप्रवरस्याऽमुकशाखिनःऽमुकवेदाध्यायिनःऽमुकशर्म्मणः प्रपौत्रीऽमुकगोत्रस्यऽमुकप्रवरस्यऽमुकशाखिनोमुकवेदाध्यायिनोऽमुकशर्म्मणः पौत्री अमुकगोत्रस्यामुकशाखिनोऽमुकप्रवरस्यामुकवेदाध्यायिनोमुकशर्म्मणामुत्री आयुष्मती वरार्थिनी श्रीरूपिणी अमुकनाम्नीकन्या किंगोत्रस्य किंप्रवरस्य किंशाखिनः किंवेदाध्यायिनः किंशर्म्मणः प्रपौत्राय किंशर्म्मणः पौत्राय किंशर्म्मणः पुत्राय आयुष्मती श्रीरूपिणी कन्यार्थिनेऽमुकनाम्नेवरायवरपक्षीयः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वि॰प॰ १५ पठेत् रासोल्लासभरेणाविभ्रमभृतामाभीरवामभ्रुवा
मभ्यर्णेपरिरभ्यनिर्भरमुरःप्रेमांधयाराधया साधुत्वद्वदनं
सुधामयमितिव्याहृत्यगीतस्तुतिव्याजालिंगनचुंबितः
स्मितमनोहारीहरिःपातुवः अमुकगोत्रस्यामुकप्रवरस्या
मुकशाखिनोऽमुकवेदाध्यायिनःऽमुकशर्म्मणःप्रपौत्रा
य॰ऽमुकगो॰ऽमु॰प्रव॰ऽमु॰शा॰ऽमुकवे॰ऽमुकशर्म्मणःपौ
त्राय ऽमुकगोत्र॰ ऽमुकप्रव॰ ऽमुकशा॰ऽमुकवे॰ ऽमुकश
र्म्मणःपुत्रायकन्यार्थिनेविष्णुस्वरूपिणोऽमुकनाम्नेवरा राम॰
य॰ किंगोत्रस्यकिंप्रवरस्यकिंशाखिनःकिंवेदाध्यायिनः १५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2

किंशर्म्मणः प्रपौत्री किंगोत्रस्य किंप्रवरस्य किंशाखिनः
किंवेदाध्यायिनः किंशर्म्मणः पौत्री किंगोत्रस्य किंप्रवर
स्य किंशाखिनः किंवेदाध्यायिनः किंशर्म्मणः पुत्री वरार्थि
नी श्री रूपिणी किंनाम्नी कन्या एवंक्रमेण त्रिवारं पक्षद्वये
गोत्रोच्चारं कृत्वा पक्षद्वये आशीर्वादश्लोकौ पठेत् संनंदं
नं द्विहस्ताहतमुरजरवाहूतकौमारबर्हित्रासान्नासाग्ररं
ध्रं विशतिफणिपतौ भोगसंकोचभाजि गंडोड्डीनालि
मालामुखरितककुभस्तांडवेशूलपाणेर्वैनायिक्यश्चि
रं वो वदनविधुतयः पांतु चीत्कारवत्यः ५ देवक्योयस्यष्ट

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तिस्त्रिभुवनविदितास्तु क्मिणीधर्म्मपत्नीपुत्राः प्रद्युम्नमु
ख्याः सुरनरजयिनो वाहनः पक्षिराजः ष्टं द्वारकेपोविहारो व्र
जपुरवनितावल्लभाराधिकाद्याश्च कें विख्यातमस्त्वेसजय
तिजगतांस्वस्त्ययेनंदसूनुः ६ कौशल्याजठरालवालज
नितसीतालतालिंगितः सिक्तेपंक्तिरथेनसोदरमहाशा
खाभिसेवार्द्धितः रक्षस्तीव्रनिदाघपाटनपटुःछायाचित्ता
नंदकृद्युष्माकंसविभूतयेऽस्तुभगवान्श्रीरामकल्पद्रुमः
७ इत्याशीर्वादश्लोकान्पठित्वा कन्यापिताददानि ३
त्रिवारंवदेत ततःशाखोच्चारंदक्षिणांसंकल्पः अद्येहेत्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दि अमुकशर्मा अहं कन्यादानांगगोत्रोच्चारकर्म्मणः सांगफ
लप्राप्तये साद्गुण्यार्थं इमां दक्षिणां ब्राह्मणेभ्यो विभज्य दास्ये
तस्मै दक्षिणां दत्वा ततो लग्ने समागते कन्यां वरं च भूषणा
दिभिर्भूषयित्वा गंधाक्षतपुष्पैः पूजयेत् तत्र मंत्राः श्रीश्चते
लक्ष्मी· श्चैवेत्येविके· सम्रखादेव्या धियेति मंत्रैः संपूज्य लग्न
दानसंकल्पं कन्यापितावरपिता च कुर्यात् स्वयं सुवर्णा
दिद्रव्यं संप्रोक्ष्य संपूज्य अद्येहत्यादि अमुकोहं अमु
कराशेः कन्यायाः सुतस्य च पाणिग्रहणलग्नात् य
त्र कुत्र स्थितानां मादित्यादिनवग्रहाणां दुष्टानां

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दुष्टफलोपशांत्यर्थं शुभानांच ग्रहाणां शुभफलप्रा
प्त्यर्थं नवग्रहाणां प्रीतये इमां सुवर्णादिदक्षिणां ब्राह्म
णाभ्यो ददे तत्सत्. इति दक्षिणां दत्वा अथ कन्यापिता ति
लकुशयवजलान्यादाय उदङ्मुखः सपत्नीकः कन्यापि
ता प्राङ्मुखोपविष्टायाः कन्याया दक्षिणहस्तांगुष्ठं गृही
त्वा कन्यादानसंकल्पं कुर्यात् स्त्री च दानपर्यंतं तज्जल
धारां दद्यात् अथ संकल्पः ॐ विष्णुर्विष्णुर्नमः परमात्मने श्री
पुराणपुरुषोत्तमाय तत्सत् श्री हंसस्याचित्सानंदरूपिणो
ब्रह्मणः निर्वाच्यमायाशक्तिजृंभिताविद्यायोगकाल

कन्यांगुष्ठं अंगुष्ठसहितं गृहीत्वा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कर्म्मस्वभावाविर्भूतमहत्तत्वोदिताहंकारत्रतीयोद्भूतविय
दादिपंचकेंद्रियनिर्म्मिताण्डकटाहेचतुर्द्दशलोकात्मकेभूलो
कलीलयातन्मध्यवर्त्तिभगवतःश्रीनारायणस्यानाभिकम
लोद्भूतसकललोकपितामहेनब्रह्मणासृष्टिंकुर्वतातद्द्वाणा
यप्रजापतिःप्रार्थितेनमहापुरुषरूपिणासितवराहावतारेण
ध्रियमाणायामस्यांभूर्लोकसंज्ञतायांधरित्र्यांसप्तद्वीपमंडि
तायांक्षीराद्याब्धिद्विगुणद्वीपवलयीकृतलक्षयोजनविस्ती
र्णजंबूद्वीपेस्वर्गस्थिताद्यमरशासिताऽवतारंगंगादिसरिद्भूषि
तेभरतखंडेऽखिलजनयावनेशौनकादिमुनिकृतनिवासनै

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मिश्रारण्ये आर्य्यावर्त्तपुण्यक्षेत्रे हिमवत्तत्पर्वतैकदेशे श्रीभ
गवतो मार्त्तंडस्य पापघ्न कालविनयज्ञ गर्गवराहाचार्य्यादि
गणितायां परार्द्धद्विसंख्यायां ब्रह्मणो द्वितीयपरार्द्धस्य द्विती
ययामे तृतीयमुहूर्त्ते श्रीश्वेतवराहनाम्नि प्रथमकल्पे स्वायं
भुवस्वारोचिषौत्तमतामसरैवतचाक्षुषेति षण्मनुनामति
क्रम्यमाणे संप्रति सप्तमे वैवस्वतमन्वंतरेऽष्टाविंशति कलि
युगस्य प्रथमचरणे श्रीमन्नृपतिविक्रमार्कसमयातीत सं
वत्सराणां समये नातिक्रांतानां षष्ठ्यब्दानां मध्येऽमुक
नाम संवत्सरेऽमुकायनेऽमुकऋतौ ऽमुकमासेऽमुक

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पक्षेऽमुकतिथावमुकवासरेऽमुकनामनक्षत्रेऽमुकयोगे
ऽमुकमुहूर्त्तेऽमुकस्थसूर्येऽमुकस्थेचंद्रेऽमुकस्थभौमेऽमु
कस्थेबुधेऽमुकस्थेदेवगुरावमुकस्थशुक्रेऽमुकस्थशनौऽमु
कस्थेराहौऽमुककेतौएवंगुणाविशिष्टायांअस्यांशुभपुण्यतिथौ
ऽमुकगोत्रोऽमुकशर्माहं सपत्नीकोहं अमुकगोत्रस्याऽमुक
प्रवरस्यऽमुकशाखिनोऽमुकवेदाध्यायिनः अमुकशर्म्मणः
प्रपौत्राय अमुकशर्म्मणः पौत्रायऽमुकशर्म्मणःपुत्राय श्रायु
ष्मतेकन्यार्थिनेविष्णुस्वरूपिणेऽमुकनाम्नेवरायऽमुकगो
त्रस्यऽमुकप्रवरस्यऽमुकशाखिनोऽमुकवेदाध्यायिनःऽमुक

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शर्म्मणः पौत्रपौत्रीऽमुकशर्म्मणः पौत्रीऽमुकशर्म्मणःपु
वि.प. १९ त्रीममश्रीरूपिणींवरार्थिनींइमांकन्यांयथाशक्त्यलंकृतां
यथाशक्तियौतकयुतांप्रजापतिदैवत्यांपुराणोक्तशतगुणी
कृतज्योतिष्टोमादिसत्रसमफलप्राप्तिकामः ममसमस्तपितॄ
णांनिरतिशयानंदब्रह्मलोकावाप्त्यादिकन्यादानविधि
त्रकार्प्पासकौशेयनूतनस्वर्णसूत्रांचितानिनानादिग्दे
शजातानिवस्त्रक्रयक्रीतानिवस्त्रमौल्यानिदुकूलोत्तरीयकं
चुकादीन्यादिकांस्यपात्रोपरि मंत्रः ॐयद्वायवासस्त्व
णाधिवासंहिरण्यपान्यस्मैसंप्रदानंशर्म्मयच्छीशंप्रियादेवेष्वाया रामः १९

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मयेतिभूषणानिसंस्थाप्य मणिमौक्तिकहीरकगारुत्मक
मरकतपुष्परागनीलमहानीलेंद्रवैडूर्यादिमहार्घविवि
धोपलशोभितस्वर्णरचितकरकंकणनूपुरपादांगुलिकाग्रै
रहारग्रैवेयनासिकेयतिलकटंकस्वर्णपुष्पकंकणाकरांगु
लीयककिरीटशिरःपुष्पादीनिविविधस्वर्णमेखलापद्
ग्रथितानिनानाभूषणानियादेवतीपुत्रवती मंत्रः रू
पणवोरूपमभ्यागंतुंयोवोविश्वेदेवाविभक्तः तस्ययथाप्र
तरचंडदक्षिणाविश्वपशपत्येतरिक्षंयतस्वसदस्ये ॐस्वर्णध
र्मस्वाहा ॐ स्वर्णार्कःस्वाहा ॐ स्वर्णशुक्रःस्वाहा स्वर्ण

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ज्योतिःस्वाहा स्वर्गःस्सूर्य्यःस्वाहा यथाशक्त्योतकादिदा
नंदद्यात ततःकन्यापिताभूयसीदक्षिणासंकल्पंकुर्य्यात्
अद्येहेत्यादिअमुकशर्म्मासपत्नी[redacted] कोहंश्रीलक्ष्मीनारा
यणप्रीतयेकन्यादानकर्म्मणःसांगफलप्राप्तयेसाद्गुण्यार्थ
मिमांभूयसींदक्षिणांनानागोत्रेभ्योदीनानाथेभ्यश्चविभज्य
दास्येतत्सन्नमम तथायथोपपन्नेनान्नेनब्राह्मणांश्चभो
जयिष्ये इतिसंकल्पदक्षिणांदत्वा अभिषेकमंत्रपाठादि
कुर्य्यात ततःसुवासिनीभिःपुरंध्रीभिःसम्यकशृंगारादिना

कन्याभूषयित्वा वरपिताप्रदत्तांकन्यामादायप्रतिग्रहस्था

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नान्निष्क्रामयति मंत्रः यदेषीत्याथर्वणा ऋषिरनुष्टुप्छं
दो लिंगोक्ता देवता कन्यानिष्क्रमणे विनियोगः ॐ यदेषिम
नसा दूरं अथ यौतकदानवाक्यानि प्रथमं सय्याया अप्र
संशयनं नित्यमृतत्वं श्रियमुन्नतिं सौभाग्यं देहि मे नितं
शय्यादानेन केशवः अथ सुवर्णांगुलीयकस्य हिरण्यग
र्भसंभूतं पवित्रं चांगुलीयकं सर्वप्रदं प्रदास्यामि प्रीणातु क
मलापतिः कुंडलयोः क्षीरोदमथनाद्दैवै रुद्भूतं कुंडलद्वयं
श्रिया सह समुद्भूतं देहस्थीः प्रीयतामिति ताम्रपात्रस्य पराप
वाद पैशून्याद भक्षस्य च भक्षणात उत्पन्नं ताम्रदानेन पापं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नश्यतितत्स्मरणात् कांस्यस्थाल्याः यानिपापानिकान्या
निकामोत्पत्तिकृतानिचकांस्यपात्रप्रदानेनतानिनश्यंतु
मेसदा अथान्यानि गोमहिष्यादीनि यौतकत्वेनदेयानि
दिशोनुपविमानो हिरण्यपर्णोवैकर्णः सत्वामनसाकरोतु
असौ अमुकीलक्ष्मीतिसंबुध्य तत्कन्यानामग्रहणाति अ
थकन्यापितावरायएनांकन्यांसमीक्षेथामितिप्रैषंदत्वा
वरः समीक्ष्यमाणांकन्यांदृष्ट्वामंत्रानपठेत् अघोरचक्षुरि
त्यादिचतुर्णांमंत्राणांप्रजापतिऋषिस्त्रिष्टुप्छंदः कुमारी
देवतापरस्परसमीक्षणेविनियोगः ॐअघोरचक्षुःपतिघ्न्यै

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शिवायपशुभ्यः सुमनाः सुवर्च्चा वीरसूर्देवकामास्यानाशनोभ
वद्विपदेचतुष्पदे ओंसोमः प्रथमो विविदे गंधर्वो विविद उत्तरः
तृतीयोग्निस्तेपतिस्तुरीयस्ते मनुष्यजः ओंसोमोददद्गंधर्वाय
गंधर्वो विविदग्नये रयिंचपुत्रांश्चादादग्निर्मह्यमथोइमां २ सा
नः पूषा शिवतमामैरय यस्यां न उशती विहरयस्यामुशंतः प्रहराम
शेफं यस्यामुकामाबहवोनिविष्ट्यै ८ इतिमंत्रान्पठित्वा कन्या
निष्क्रमणसमये एकस्मैब्राह्मणाय जलपूर्णकुंभं दत्वास्कं
धेधृत्वा मौनेनाभिषेकपर्य्यंतमेशान्यांदिशितिष्ठेत् अथवरः
शालायामागत्याग्नेः पश्चात्तेजनीकटंवादक्षिणपादेनप्रवृत्ता

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्षेपमग्रदक्षिणामग्निं परीत्य कन्यावरस्य दक्षिणतः उपविश
ति ततः सर्वां विवाहसामग्रीं संपाद्य आचम्य अर्घ्यं स्थाप्य
प्राणायामं कृत्वा वरः प्रधानसंकल्पं कुर्यात् अद्येह देशका
लौ संकीर्त्य॰ अमुकगोत्रोऽमुकराशिरमुकशर्म्माहं श्रुतिस्मृ
तिपुराणोक्तफलप्राप्तये ब्रह्मविधिना पितृदत्तामिमां गौरीक
न्यां विवाहयिष्ये तत्पूर्वांगत्वेन विवाहकर्म्मणि ब्रह्मकर्म्म
कर्त्तुं ब्राह्मणपूजनं वरणं करिष्ये इति ब्रह्मणोऽर्घ्यं दत्वा॰ गं
धाक्षतपुष्पैः संपूज्य॰ एभिर्गंधाक्षतपुष्पपुंगीफलद्रव्यवासो
लंकरणादिभिर्वरकन्ययोर्विवाहकर्म्मणि ब्रह्मकर्म्मकर्त्तुं ब्र

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्मत्वेनत्वामहंवृणे वृतोस्मीतिप्रत्युक्तिः यथाचतुर्मुखो
ब्रह्मेतिपठित्वाएवमुत्तरासने वृतोब्रह्मापूर्वकल्पित
दक्षिणासनेउपविशेत् ततोब्रह्मोपवेशनादिपर्य्युक्षणां
तेकर्म्मकुर्य्यात् प्रणीताप्रोक्षणपात्रासादनांतंविशेषकल्प
नीयानिवस्तूनि आसादयेत् शमीपालाशमिश्रालाजाः अ
श्मानमखंडलोहितमानडुहंचर्म्मतदभावेरक्तवस्त्रं कुमा
रीभ्रातासूर्पेनवीनंआचार्य्याःवरद्वयंततःपर्य्युक्षणांतंकर्म्म
कृत्वा वरोदेवताभिध्यानंकुर्य्यात् अद्यविवाहकर्म्मणिहं
यक्ष्ये तत्रप्रजापतिमिंद्रमग्निंसोममग्निंवायुंसूर्य्यमग्निवं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वि॰प॰ २३ रुणोसवितारंविष्णुंविश्वान्मरुतःस्वकान् वरुणादितिंप्र
जापतिं ऋताषाडृतधामानमग्निंगंधर्वमोषधीरप्स
रसोमुदसंहितसमानंसूर्य्यंगंधर्वंमरीच्यप्सरसआयु
र्वस्तुष्मणंसूर्य्यरश्मिंचंद्रमसंगंधर्वंनक्षत्राण्यप्सरसोभे
कुरोरिषिरंविश्वव्यचसंवातंगंधर्वमप्सरऊर्जोभुज्युस्सुप
र्णंयज्ञंगंधर्वंदक्षिणाप्सरसस्तावाप्रजापतिंविश्वकर्म्माणं
नर्कंगंधर्वमृक्सामाप्सरसएष्टीचित्तंमाकूतिंविज्ञातंवि
ज्ञातिंमनःशक्करीर्दर्शपौर्णमासेबृहद्रथंतरंप्रजापतिंवि रामः २३
श्वभूतानामधिपतिमिंद्रंज्येष्ठानामधिपतिंयमंपृथिव्या

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नामध्धिपतिंवायुरंतरिक्षस्याधिपतिंसूर्य्यंदिवोधिपतिंचंद्रम
संनक्षत्राणामधिपतिंबृहस्पतिंब्रह्मणोऽधिपतिंमित्रंसत्याना
मधिपतिंवरुणमपामधिपतिंसमुद्रंश्रोतानामधिपतिंसोमम्मौ
षधीनामधिपतिंसवितारंप्रसवानामधिपतिंविष्णुंपर्वतानाम
धिपतिंमरुतोगणानामधिपतिंपितॄनृपितामहानृपरानृच्च
परानृवरानृततानृ ततमुखानाग्निमाग्निंवैवस्वतंमृत्युंचान्ये
नाहेयक्ष्ये अथकन्यादेवता भिध्यानंकरोति अर्य्यमणामग्नि
मव्यापरमगमाग्निंसवंमणामग्निंभगेलाजैरहेयक्ष्ये ततोवरः
प्रजापतिंस्विष्टकृतंचान्यनाहेयक्ष्ये इदमाज्यंकृततदेवता

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भ्योमयापरित्यक्तं यथादैवतमस्तु ततएतंतेतिप्रतिष्ठा ॐ
भूर्भुवःस्वयोजकनामाग्नेस्तुप्रतिष्ठितोवरदोभव तद्देवाग्नि
रितिचत्वारिंशृंगेतिमंत्राभ्यांध्यानावाहनपाद्यादिनीराजनां
तंपूजयित्वादक्षिणाजान्वाच ब्रह्मणान्वारब्धोमनसाप्रजा
पतिंध्यात्वा ॐप्रजापतयेस्वाहा इदंप्रजापतये ॐमिंद्राय
स्वाहा इदमिंद्राय ॐमग्नयेस्वाहा इदमग्नये ॐसोमा
यस्वाहा इदंसोमाय अथमहाव्याहृतिहोमः व्याहृतीनां
प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुप छंदांसि अग्निवायु
सूर्य्योदेवतासर्वप्रायश्चित्तहोमेविनियोगः ॐ भूःस्वाहा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इदंभूः ॐभुवःस्वाहा इदंभुवः ॐस्वःस्वाहा इदंस्वः ॐ
त्वन्नोअग्नेवरुणस्यविद्वान्० ॐसत्वन्नोअग्नइदमग्नि
वरुणाभ्यां अपश्चाग्नइदमग्नये येतेसतमितिशुनः
शेपऋषिस्त्रिष्टुपछंदोवरुणसवितृविष्णुविश्वेदेवामरु
तःस्वर्कादेवताःसर्वप्रायश्चित्तहोमेविनियोगः ॐयेतेशतं
व० इदंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यः
स्वर्केभ्यः उदुत्तममितिशुनःशेपऋषिस्त्रिष्टुपछंदोव
रुणोदेवतासर्वप्रायश्चित्तहोमेविनियोगः उदुत्तमंवरुण
पाश० इदंवरुणायादित्यै दक्षिणासंकल्पः अद्येहामुक

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शर्म्मासवत्सकोऽहं सर्वप्रायश्चित्तहोमकर्म्मणः सत्कुरणा
र्थमिमां दक्षिणामाचार्य्याय ब्रह्मणे च यथांशेन दास्ये
मंत्रपाठः उत्सर्गचतु[illegible]रीये च वरुणो विष्णुना सह तुष्टि
पुष्टिकरो नित्यमुभयोः स्त्रीकुमारयोः अथ राष्ट्रभृद्धो
मप्रयोगो यथा ऋताषाडिति प्रजापतिऋषिः यजुश्छं
दः ऋताषाड् ऋतधामाग्निर्गंधर्वो देवता होमे विनियोगः
ॐ ऋताषाड् ऋतधामाग्निर्गंधर्वः स न इदं ब्रह्म क्षत्रं पातु
तस्मै स्वाहा वाड्तुभ्यं इदं ऋताषाहे ऋतधाम्नेगंधर्वा
य पुनः ऋताषाड् ऋतधामाग्निर्गंधर्वस्तस्यौषधयोऽप्सर

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सोमुदोनामताभ्यःस्वाहा इदमोषधीभ्योप्सरोभ्योमुद्भ्यः स
ꣳहित इति प्रजापतिर्ऋषिर्यजुःछन्दः संꣳहितो विश्वसा
मा सूर्य्यो गंधर्वो देवता होमे विनियोगः ॐ संꣳहितो विश्व
सामा सूर्य्यो गंधर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट्
ताभ्यः इदं संꣳहिताय विश्वसाम्ने सूर्य्याय गंधर्वाय पुतः
संꣳहित इति प्रजापतिर्ऋषिर्यजुःछन्दः मरीचयोप्सरस
आयुवो देवता होमे विनियोगः ॐ संꣳहितो विश्वसामा
सूर्यो गंधर्वस्तस्य मरीचयोप्सरस आयुवो नाम ताभ्यः स्वाहा
इदं मरीचयोप्सरोभ्य आयुभ्यः देवता होमे विनियोगः ॐ सं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

थं हितो विश्वसामा सूर्यो गंधर्वस्तस्य मरीचयोऽप्सरस आ
युवो नाम ताभ्यः स्वाहा इदं मरीचयोऽप्सरोभ्य आयुभ्यः सु
षुम्णस्त्व इति प्रजापति ऋषिर्यजुः छंदः सुषुम्णः सूर्यर
श्मिश्चंद्रमा गंधर्वो देवता होमे विनियोगः सुषुम्णः सूर्य
रश्मिश्चंद्रमा गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्
इदं सुषुम्णाय सूर्यरश्मये चंद्रमसे गंधर्वाय: पुनः सुषु
म्णा इति प्रजापतिर्ऋषिर्यजुः छंदो नक्षत्राण्यप्सरसो भेकु
रयो देवता होमे विनियोगः ॐ सुषुम्णः सूर्यरश्मिश्चंद्र
मा गंधर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम ताभ्यः स्वाहा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इदंनक्षत्रेभ्योप्सरोभ्योभेकुरीभ्यः इषिरइतिप्रजापतिर्ऋषि
र्यजुःछंदः इषिरविश्वव्यचावातोगंधर्वोदेवताहोमेविनि
योगः ॐ इषिरोविश्वव्यचावातोगंधर्वःसनः इदंब्रह्मक्षत्रं
पातुतस्मैस्वाहावाट्ताभ्य इदं इषिरायविश्वव्यचसेवाताय
गंधर्वाय पुनः इषिरइतिप्रजापतिर्ऋषिर्यजुःछंदस्तस्यापो
प्सरसऊर्ज्जोदेवताहोमेविनियोगः ॐ इषिरो विश्वव्यचावा
तोगंधर्वस्तस्यापोप्सरऊर्ज्जोदेवतानामताभ्यःस्वाहा इदं
म्य्द्भ्योप्सराभ्यःऊर्ज्जेभ्यः भुज्युरितिप्रजापतिर्ऋषिःयजुः
छंदोभुज्युसुपर्णोयज्ञोगंधर्वोदेवताहोमेविनियोगः ॐभु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ज्युस्तुपर्णो यज्ञो गंधर्वः स न इदं ब्रह्मक्षत्त्रं पातु तस्मै स्वाहा
वि०प० वाट् इदं भुज्युवे सुपर्णाय यज्ञाय गंधर्वाय ॐ भुज्युप्रजा
२७ पतिऋषिर्यजुः छंदो दक्षिणाप्सरसो देवता होमे विनियोगः
ॐ भुज्युः सुपर्णो यज्ञो गंधर्वस्तस्य दक्षिणाप्सरसस्तावाना
मताभ्यः स्वाहा इदं दक्षिणाप्सरोभ्यस्तावानामताभ्यः प्र
जापतिऋषि यजुः छंदः प्रजापति विश्वकर्मा मनो गंधर्वो दे
वता होमे विनियोगः ॐ प्रजापति विश्वकर्मा मनो गंधर्वः
स न इदं ब्रह्मक्षत्त्रं पातु तस्मै स्वाहा वाट् इदं प्रजापतये वि रा०म०
श्वकर्मणे मनसे गंधर्वाय ॐ प्रजापतिऋषिर्यजुः छंदः २७

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ऋक्सामान्यप्सरएष्टयो देवताहोमेविनियोगः ॐप्रजा
पतिर्विश्वकर्मामनोगंधर्वस्तस्य ऋक्सामान्यप्सरएष्टयो
देवतानामताभ्यः इदं ऋक्सामभ्योऽप्सरोभ्यएष्टिभ्यः
अथराष्ट्रभृज्जयाभ्यातानमंत्राणांहोमस्यप्रत्येकंफ
लविशेषोक्तेर्विशेषफलमीप्सुन् प्रत्येकदक्षिणांकुर्या
त् इतिवदंति तच्छिष्टाचारतोवश्यकत्वंव्याहृतिसंप्रदाय
अथदक्षिणासंकल्पः अद्येहामुकशर्म्मासवधूकोहंकृ
तेनराष्ट्रभृद्धोमस्यसांगफलप्राप्तिसाद्गुण्यार्थमिमांद
क्षिणामाचार्यब्रह्मभ्यांयथांशेनदास्ये मंत्रपाठः गोविं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दागोकुलस्यैवगोपीभिश्चहरेसहतुष्टिपुष्टिकरोनित्यमस्तुमे
योःस्त्रीकुमारयोः अथजयाहोमः चित्तंचेत्यादीनांत्रयो
दशमंत्राणांपरमेष्ठिऋषिर्यजुःछंदश्चित्तादयोदेवताःप्रति
मंत्रहोमेविनियोगः ॐ चित्तंचस्वाहा इदंचित्ताय ॐ चित्ति
श्चस्वाहा इदंचित्त्यै ॐ आकूतंचस्वाहा इदमाकूताय ॐ
आकूतिस्वाहा इदमाकूत्यै ॐ विज्ञातंचस्वाहाइदंविज्ञाता
य ॐ विज्ञातिश्चस्वाहा इदंविज्ञात्यै ॐ मनसेस्वाहा इदं
मनसे ॐ शक्करीश्चस्वाहा इदंशक्कर्य्यै ॐ दर्शंचस्वाहा
इदंदर्शाय ॐ पौर्णमासंचस्वाहा इदंपौर्णमासाय ॐ बृ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हैं स्वस्वाहा इदंबृहते ओंरथंतरेचस्वाहा इदंरथंतराय
ओंप्रजापतिजयतींद्रायप्रापद्रुयः पृतनाजयेषुतस्मैवि
शः समनंतसर्वाः सऊयसहन्योवभूवस्वाहा इदंप्रजाप
तयेजयायइंद्राय उदकस्पर्शः अद्यापिदक्षिणा अद्येह
मुकशर्म्मासवधूकोहंचित्तादिहोमस्यसांगफलप्राप्तय
साद्गुण्यार्थंइमांदक्षिणामाचार्य्यायब्रह्मभ्यांयथांशेनद्दा
स्ये मंत्रपाठः चिरंजीवीमहातेजाश्विनाद्यास्वदिवौकसः
प्रयच्छंतुवरांवांछामुभयोःस्त्रीकुमारयोः ३ अथाभ्याता
होम अनग्नीर्भूतानामधिपतीत्यादीनोपितरःपितामहा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इत्येतानां सर्वेषां मंत्राणां प्रजापतिऋषिस्त्रिष्टुप्छंदः मंत्रो
क्ता देवताः सर्वा देवताः प्रतिमंत्रं होमे विनियोगः ॐ अग्निर्भूता
नामधिपतिः समावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्य
स्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा इदमग्न
ये भूतानामधिपतये ॐ इंद्रो ज्येष्ठानामधिपतिः समाव
त्वस्मिन् ब्रह्मण्यस्मिन्· इदमिंद्राय ज्येष्ठानामधिपतये ॐ
यमः पृथिव्यानामधिपतिः समावत्वस्मिन्· इदं यमाय पृथि
व्यानामधिपतये अत्रापि रत्वाउदकस्पर्शः ॐ वायुरंतरि
क्षस्याधिपतिः समावत्वस्मिन्· इदं वायवेअंतरिक्षस्याधि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पतये ॐ सूर्य्यो दिवोधिपतिःसमावत्वस्मिन्· इदं सूर्याय
दिवोधिपतये ॐ चंद्रमानक्षत्राणामधिपतिःसमावत्वस्मि
न्· इदं चंद्रमसे नक्षत्राणामधिपतये ॐ बृहस्पतये ब्रह्मणो
धिपतिःसमावत्वस्मिन्· इदं बृहस्पतये ब्रह्मणोधिपतये
ॐ मित्रं सत्वानामधिपतिःसमावत्वस्मिन्· इदं मित्राय सत्वा
नामधिपतये ॐ वरुणोऽपामधिपतिःसमावत्वस्मिन् इदं
वरुणायापामधिपतये ॐ समुद्रःश्रोत्यानामधिपतिःस
मावत्वस्मिन् इदं समुद्राय श्रोत्यानामधिपतये ॐ अन्नं
साम्राज्यानामधिपतिःसमावत्वस्मिन्· इदमन्नाय साम्राज्या

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नामधिपतये ॐ सोमो ओषधीनामधिपतिः स मावत्वस्मि
न् इदं सोमायौषधीनामधिपतये ॐ सविता प्रसवानाम
धिपतिः स मावत्वस्मिन् इदं सवित्रे प्रसवानामधिपतये
ॐ रुद्रः पशूनामधिपतिः स मावत्वस्मिन् ~~इदं रुद्राय पशूना~~
~~मधिपतिस्म~~ इदं रुद्राय पशूनामधिपतये ॐ त्वष्टा रूपाणा
मधिपतिः स मावत्वस्मिन् इदं त्वष्ट्रे रूपाणामधिपतये ॐ वि
ष्णुः पर्वतानामधिपतिः स मावत्वस्मिन् इदं विष्णवे पर्वताना
मधिपतये ॐ मरुतो गणानामधिपतिः स मावत्वस्मिन् इदं
मरुद्भ्यो गणानामधिपतिभ्यः ॐ पितरः पितामहाः परे तता

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्ततामहास्त इह समावत्वस्मिन् इदं पितृभ्यः पितामहेभ्यः
परेभ्योवरेभ्यस्ततस्तत्ततामहेभ्यः अप्रणीतोदकस्पर्शः अ
त्रापि दक्षिणा अद्येहामुकशर्म्मासवधूकोहं कृतैतदन्यातान्
होमस्यसांगफलप्राप्तिसादुण्यार्थमिमां दक्षिणामाचार्य्य
ब्रह्मभ्यो यथांशेनदास्ये मंत्रपाठः उत्सर्गे चतुरीयचवरूणी
विष्णुनासह पुत्रैर्लक्ष्मीस्तथाकामानुभयोः स्त्रीकुमारयोः
अथाग्न्यादिपंचकहोमः अग्निरत्वित्यादिमंत्राणांचतुर्णां
प्रजापतिर्ऋषिस्त्रिष्टुप्छंदः अग्निर्देवताप्रतिमंत्रंहोमे
विनियोगः ॐ अग्निरतुप्रथमोदेवतानांसोस्यैप्रजामुंचेतु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वि॰प॰
३०

मृत्युपाशात् तदयर्थंराजावरुणोनुमन्यतांयथेयर्थंस्त्री
मघवन्नरोदत्तस्वाहा इदमग्नये ॐइमामग्निस्त्रायतांगा
र्हपत्यःसोस्यैनयतुदीर्घमायुः अशून्योपस्थाजीवतामस्तु
मातापौत्रमानंदमभिदुध्यतामियर्थंस्वाहा इदमग्नये
ॐस्वस्तिनोअग्नेदिवापृथिव्यानिधेह्ययथादृशायदस्याम
पिदिवियातंप्रजास्तेतदस्मासुद्रविणंधेहिचित्रर्थंस्वाहा
इदमग्नये ॐसुगन्नुपंथाप्रदिशंनएहिज्योतिष्मधेह्यजर
न अपेतुमृत्युरमृतंमआगाद्वैवस्वतोनोऽभयंकृणोतुस्वा रामः
हानोऽभयंकृणोतुस्वाहा इदमग्नयेवैवस्वताय अत्रापिशि ३०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ष्टाचाराद्भूवरस्त्रापतद्धोयम्तवेत्तुहोति परंमृत्युवीती
सवस्तुकंक्रषिः त्रिष्टुपृछंदोमृत्युदेवताहोमेविनियोगः
ॐ परंमृत्युरनुपरेहिपंथायस्तेदन्यइतरोदेवयानात् चक्षु
पतेशृणवतेतेब्रवीमिमानप्रजारीरिषोमोतवीरान् स्वा
स्वाहा इदंमृत्यवे उदकस्पर्शः अथापिदक्षिणा अद्येहास्तु
कशर्म्मा सवधूकोहंकृतैतदग्न्यादिपंचकहोमकर्म्मणः सा
दुणार्थं इमांदक्षिणामाचार्य्यब्राह्मणायथांशेनदास्ये
इ पाठः गोविंदोगोकुलश्चैवगोपीभिश्चहरेप्रियः तुष्टिपुष्टि
करोनित्यमुभयोः स्त्रीकुमारयोः ततआचम्य अथपाणिग्रह

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वि.प. ३२

णोगम्भूतोलाजाहोमः अत्रकन्यायाकथनं अायुष्मानस्तु
मेपतिरितिमंत्रलिंगात् कुमारीतिष्ठत्यंजलिंविदधाति व
रस्तिष्ठन्कुमार्य्यंजलिंगृहीत्वा कुमार्य्याभ्राता लौकिका
ग्निसिद्धान्लाजान्घृतेनाभिघार्य्य सूर्य्यं चतुर्द्धाकृत्वा
संप्रोक्ष्यतेष्वेकभागंकुमार्य्यंजलावावपति साचतिष्ठति
प्राङ्मुखीमंत्रंपठित्वाजुहुयात् अर्य्यमणमित्यथर्वणऋ
षिरनुष्टुप्छंदः अर्य्यमाग्निर्देवतालाजाहोमेविनियोगः
ॐ अर्य्यमणंदेवंकन्याअग्निमयक्षत सनोअर्य्यमादेवतायेत रामः ३२
मुंचतुमापतेस्तयेस्वाहा इदमर्य्यम्णेऽग्नयेइतीयाश्रीजुहो

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ति इयंनारीत्यथर्वणऋषिरनुष्टुप्छन्दोऽर्यमाग्निर्देव
तालाजाहोमेविनियोगः ॐ इयंनार्य्युपब्रूतेलाजानाव
पर्यंतिका आयुष्मानस्तुमेपतिरेधन्तांज्ञातयोममस्वाहा इ
दमग्नये इमांल्लाजानामित्याथर्वणऋषिरनुष्टुप्छन्दोऽर्य
माग्निर्देवतालाजाहोमेविनियोगः इमांल्लाजानावपाम्यग्नौ
समृद्धिकरणंतवममतुभ्यंवसंवदनंतदग्निरनुमन्यतामियं
स्वाहा इदमग्नये सर्वान्जुहोति अथवरोवध्वादक्षि
णहस्तंसांगुष्ठंगृह्णाति गृभ्णामित्यादीनांचतुर्णांयाज्ञव
ल्क्यभारद्वाजाथर्वणाऋषयस्त्रिष्टुबनुष्टुप्यजुःछन्दांसिभ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भगोर्य्यमासवितापुरंध्रयोदेवताकन्यायाः पाणिग्रहणोवि
नियोगः ॐगृभ्णामितेसौभगत्वायहस्तंमयापत्याजरदृ
ष्टिर्यथासतः भगोर्य्यमःसवितापुरंध्रिर्मह्यंत्वादुर्गार्हपत्या
यदेवा ॥ अमोहमस्मिसात्वꣳहमस्यमोहंसायाहमस्मिऋक्त
द्यौरहंपृथिवीत्वंतावेहिविवाहेसहरेतोदधावहैप्रजांप्र
जनयावहै पुत्रान्विन्दावहैबहून्तेसंतु जरदष्टयेशे
षविष्णुः सुमनस्यमानोपश्येमशरदःशतं [illegible] जीवेमश
रदःशतꣳशृणुयामशरदःशतमदीनाःस्यामशरदःशतंभू रामः
यश्चशरदःशतात ॥ अथैनामश्मानमारोहयति ॐआरोहे ३२

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ममब्रह्मा नमस्यै वतत्वथ्ठं स्थिराभव अभितिष्ठ पृतन्यतो ववा
धस्व पृतनायते आनूढायांव ध्वांतस्याः शिरसि दक्षिणहस्ते
नीत्वा गाथां गायति सारस्वतीति विश्वामित्र ऋषिरनुष्टुप्
छंदः सारस्वती देवता गाथा गाने विनियोगः ॐसरस्वति प्रेद
मवस्तु भगवाजिनीवती यात्वो विश्वस्य भूतस्य प्रजायामस्या
ग्रतः यस्यां भूतथ्ठं समभवद्यस्यां विश्वमिदं जगत तामद्य
गाथां गास्या मियास्त्रीणामुत्तमं यशः मंत्रपादौ वरस्यैव अ
थवधूवरौ दक्षिणमग्निं परिक्रामतः वरएवमंत्रं पठत् तु
तुभ्यमग्न इत्यथर्वणाऋषिरनुष्टुप्छंदः अग्निर्देवता परिक्र

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मणोविनियोगः तुभ्यमग्नेपर्य्यवहान्सूर्य्यांवहंतुनासह
वि॰प॰ पुनः पतिभ्योजायांदद्अग्नेप्रजयासह इतिमंत्रंपठन्कुमा
३८ रीलाजान्वपंतीपरिक्रमणंकुर्यात् एवंपुनर्वारद्वयेला
जाहोमोऽश्मारोहणंगाथागानपरिक्रमणानिकृत्वा तृ
तीयापरिक्रमणानंतरंकुमारीभ्रातासूर्पकोणप्रदेशेनस
र्वान्लाजान्कुमारीहस्तेसावपतीति ॐभगायस्वाहा इ
दंभगाय इतिकृत्वा ततःसमाचारात्तूष्णींचतुर्थपरिक्रम
णंकृत्वा यथास्थानमागत्योपविश्य ब्रह्मान्वारब्धः ॐअ रामः ३८
ग्नयेप्रजापतयेस्वाहा इदमग्नयेप्रजापतये इतिकृत्वा अ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

थसप्तवर्तिकाप्रज्वाल्य एनामुदीचिंसप्तपदानिक्रामयति
ॐएकमुखेविष्णुस्त्वानयतु ॐद्वेऊर्जेविष्णुस्त्वानयतु त्री
णिरायस्पोषायविष्णुस्त्वानयतु चत्वारिमायोभवायवि
ष्णुस्त्वानयतु पंचपशुभ्यांविष्णुस्त्वानयतु षडृतुभ्योविष्णु
स्त्वानयतु सखेसप्तपदाभवसामामनुव्रताभवविष्णुस्त्वा
नयतु इतिमंत्रैःषड्वर्तिकानिर्वाप्य सप्तमीवर्तिकाज्वलंती
मेवस्थापयंतीवधूः ततोनिष्क्रमणप्रभृत्युदकुंभमादाय उ
त्तरतःस्थितोब्राह्मणस्तस्यहस्तस्थंकलशाज्जलपात्रमादाय
तेनजलेनवरोमूर्द्धन्यभिषिंचति आपइतिप्रजापतिऋषिः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रतिष्ठाछन्दः आपोदेवता मूर्द्धाभिषेके विनियोगः आपःशि
वाः शिवतमाः शान्ताः शान्ततमास्ताः यामवचनेन स्वकुलवृद्धा
स्त्रियश्च कथयन्ते तास्ते हे एव निभेषजं ॐ आपोहिष्ठामयोभु
वस्तान ऊर्ज्जे दधातुनः महेरणाय चक्षसे योवः शिवतमोर
सस्तस्य भाजयतेहनः उशतीरिव मातरः तस्मा अरंगमामवो
यस्यक्षयाय जिन्वथ आपोजनयथा चनः ततः सूर्य्यमुदी
क्षस्वेति प्रेषिता वधूः सूर्य्यमुदीक्षयति ॐ तच्चक्षुर्देवहितं पु
रस्ताच्छुक्रमुच्चरत् पश्येम शरदः शतं जीवेम शरदः शतꣳ
शृणुयाम शरदः शतं प्रब्रवाम शरदः शतं महीनाः स्याम शरदः श

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रदः शतम्भूयश्चशरदः शतात् अथवरोवध्वादक्षिणांशस्योपरि
हस्तं नीत्वा हृदयमालभ्यते ममव्रते इति प्रजापतिऋषिस्त्रि
ष्टुप्छंदः प्रजापतिर्देवता वध्वाहृदयालंभने विनियोगः ॐ मम
व्रतेते हृदयं दधामि मम चित्तमनुचित्तंतेस्तु ममवाच
मेकमनाजुषस्व प्रजापतिर्द्देवस्त्वानियुनक्तु मह्यं अथैनाम
भिमंत्रयते सुमंगलीरिति प्रजापतिऋषिर्यजुः छंदः वधूदेव
ता अभिमंत्रणे विनियोगः ॐ सुमंगलीरियंवधूरिमां समेत
पश्यत सौभाग्यमस्यै दत्वा यथास्यो विपरेतन इति मंत्रेण सोमं
तसिंदूरमपिदापयेति वृद्धाः अथ शिष्टाचाराद्वरस्यवामभागे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वधूस्तपश्चेशयेत्सा वधूर्वरस्यांचलं प्रगृह्य यथास्थाने निवेशय
वि॰प॰ ३६ ति अथाग्नेःपश्चात् उदग्वाऽऽनुडुहे चर्म्मणि रक्तवस्त्रखंडे वा
कश्चित्पुरुषः वधूस्तथाप्युपवेशयति मंत्रः इहगावो इ
तिप्रजापतिर्ऋषिस्त्रिष्टुप् छंदोलिंगोक्ता देवता वध्वा उपवेश
ने विनियोगः ॐ इहगावो निषीदन्त्विहाश्वा इहपुरुषा इहसहस्र
दक्षिणा इहपुरुषा निषीदन्तु ततो यथास्थानमुपवेश्य ग्रा
मवचनं कुर्य्यात् ग्रामवचनेन स्वकुलवृद्धास्त्रियश्च क
थयंते वधूहस्तेन वरस्य पादप्रक्षालनं वरवध्वोः परस्परं तिल रा॰म॰ ३६
कं इत्यादिनां सह दधिगुडप्राशनं परस्परोच्छिष्टलापनं य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

थादेशकुलाचारं वा कुर्य्यात विवाहश्मशानयोर्ग्रामवचन
प्रमाणमितिश्रुतेः ततश्चाचम्यब्रह्मन्वारब्धः ओं अग्नयेस्वि
ष्टकृते स्वाहा इदमग्नये स्विष्टकृते ततः संश्रवप्राशनं पवित्र
प्रतिपत्तिः प्रणीताविमोकः ब्रह्मणे पूर्णपात्रदानं संकल्पः
अद्येहामुकशर्म्मा सवधूकोहं विवाहहोमकर्म्मणः सांगफ
लप्राप्तये ऽ पूर्णपूर्णार्थं इदं पूर्णपात्रं सद्रव्यं ब्रह्मणे तुभ्यं संप्र
ददे मंत्रपाठः अकन्नकर्मकृते ततः अत्र वरः स्वाचार्य्याय वरं द
दाति गोत्रं ब्राह्मणस्य वरः ग्रामो राजन्यस्य अश्वो वैश्यस्येति स्व
त्रं तत्र संकल्पः अद्येहेत्यादि अमुकशर्म्मा सवधूकोहं विवाह

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

होमकर्मणः सांगफलप्राप्तये साद्गुण्यार्थमिमां दक्षिणां ना
नागोत्रेभ्यो नटकर्त्तृकगायकेभ्यो दीनानाथेभ्यश्च विभज्य दास्ये
तत्सन्नमम इति संकल्प्य आचार्यादिभ्यो ऽन्येभ्यो ब्राह्मणेभ्यश्च
दक्षिणां दत्वा अभिषेकतिलकमंत्रापाठादि कृत्वा अथ वधू ध्रु
वं पश्येत् दिवाचेदस्तमितसूर्ये रात्रौ वरदानानंतरं ध्रुवमुदीक्षेत
तत्र मंत्रः ॐ ध्रुवमसी ति प्रजापति ऋषिः पंक्तिश्छंदो ध्रुवो देवता
ध्रुवोदीक्षणे विनियोगः ॐ ध्रुवमसि ध्रुवं त्वा पश्याम्यध्रुवो धि पोष्या
मह्यं त्वादाद्बृहस्पतिः मयापत्यप्रजापतिः संजीवशरदः शतमिति
मंत्रेण पश्येत् सायं दिन पश्यामीति ब्रूयात् अथात्रिरात्रनियम

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

माः त्रिरात्रमक्षारालवणोस्यातां अधःशायीयातां संवत्सरं द्वि
रात्रं षड्रात्रं षड्रात्रं वा मैथुनं न कुर्यात इति शिक्षा ततः पंच
वाद्यपूर्वकं शालातोभ्यंतरे गत्वा जीवमातृपूजनं कुर्यात
आचम्य अर्घ्यं संस्थाप्य पूजासंकल्पः अद्येहामुकश
र्म्माः सवधूकोहं विवाहकर्म्मणुत्तरांगत्वेन सर्वाभ्युदयप्राप्तये
लिखितानां कल्याण्यादिजीवमातॄणां पूजनं करिष्ये एतं ते इ
ति प्रतिष्ठा ॐ भूर्भुवः स्वः कल्याण्यादी सप्त जीवमातरः सुप्रति
ष्ठितावरदाभवंतु ध्यानं कल्याणीमंगलाभद्रा पुण्या पुण्यमु
खीतथा जया च विजया चैव सप्तैता जीवमातरः इति ध्यात्वा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नाममंत्रेणपूजनं ॐकल्याण्यैनमः ॐमंगलायैनमः ॐभ
द्रायैनमः ॐपुण्यायैनमः ॐपुण्यमुख्यैनमः जयायैनमः
विजयायैनमः इतिनाममंत्रेणपाद्याद्निीराजनांतंसंपूज्य
वसोः पवित्रमसीतिवसोर्धाराःपातयित्वा पुष्पांजलिंसमर्प्य
दक्षिणांचदत्वा महानीराजनंचकृत्वा भोजनंविधाय श्व
श्रूश्वसुरयोःपादाभिवंद्य· वधूंशिविकादियानेनवाहयि
त्वा स्वगृहमागच्छन्स्वगृहमागत्यवरः स्वमातरंप्रणमेत्
वरमात्रादयःशिविकादियानाद्वधूमुत्तार्य्य· वधूंस्वहस्ता
च्छ्वश्रूपादयोःप्रणिपातयेत्तत्पादतलेधृत्वा आशिर्भिर्वर्धयं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अभिवंद्य गृहप्रवेशंकुर्य्यात् तत्रपूर्वेद्वारदेशेद्वारमातृपूजनं
विधाय लग्नदानंकुर्य्यात् तत्रसंकल्पः अद्येहेत्यादि अ
मुकशर्म्मासवधूकोहं अस्यावध्वाःपितृगृहात्स्वगृहप्रवे
शस्यगृहप्रवेशलग्नाद्यत्रकुत्रस्थितादित्यादिनवग्रहाणां
दुष्टानांदुष्टफलोपशांत्यर्थंशुभफलप्राप्तये आदित्यादि
नवग्रहाणांप्रीतयेइमांदक्षिणांब्राह्मणेभ्योदास्ये इतिदक्षि
णांदत्वा अभ्यंतरेगत्वा जीवमातृपूजनंकुर्य्यात् आचम्या
र्घंस्थाप्य अद्येहामुकशर्म्मासवधूकोहं विवाहकर्म्मण
उत्तरांगत्वेनस्वगृहप्रवेशकर्म्मणिसर्वाभ्युदयप्राप्तयेमिति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

लिखितानां कल्याणपादिजीवमातृणांपूजनंकरिष्ये एतै
तेतिप्रतिष्ठाप्य कल्याणीमंगलाभद्रेतिमंत्रेणाध्यानावाहन
पाद्यादिनीराजनांतंसंपूज्य वसोर्धारांपातयित्वा पुष्पांजलिं
समर्प्य दक्षिणांसंकल्पब्राह्मणेभ्योदत्वा अभिषेकतिलक
मंत्रपाठादिकृत्वा ततोमातृश्वश्र्वादयोमहानीराजनंचकुर्व्यु
र्वरवधूभ्यांदधिगुडप्राशनंकृत्वा यथासुखंविहरेतः इति
विवाहपद्धतिःसमाप्ता शुभम् सं॰१९३७ वैशाख५ गतेगुरुवारे
लिखितंश्रीमपतीसर्म्मणाः पठनार्थंलक्ष्मीरामशर्म्मणः शुभं

दुर्गादत्त शर्मा
दुर्गादत्त शर्मा
Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh